कफदोषप्रकोपणत्वञ्च। पक्वचिञ्चाफलरसगुणाः। मधुराम्लत्वम्। रुचिप्रदत्वम्। शोफपाककरत्वम्। लेपे व्रणदोषनाशित्वञ्च॥ अस्याः पत्रस्य गुणाः। शोफरक्तदोषव्यथानाशित्वम्। अस्याः शुष्कत्वक्क्षारस्य गुणः। शूलमन्दाग्निनाशित्वम्। इति राजनिर्घण्टः॥

"अम्लिकायाः फलं पक्वं मर्द्दितं वारिणा दृढ़म्।
शर्करामरिचोन्मिश्रं लवङ्गेन्दुसुवासितम्॥
अम्लिकाफलसम्भूतं पानकं वातनाशनम्।
पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधकम्॥"
इति भावप्रकाशः॥

वृक्षाम्लम्। इति विश्वः॥

तिन्तिड़ीकं, क्ली, (तिम्यते क्लिद्यते मुखं येन। तिम + "फर्फरीकादयश्च।" उणां ४। २०। इति ईकन्प्रत्ययेन निपातनात् साधुः।) वृक्षाम्लम्। इत्यमरः। २। ९। ३५॥ (यथा, तन्त्रसारे पुरश्चरणप्रकरणे।

"रम्भाफलं तिन्तिड़ीकं कमला नागरङ्गकम्।
फलान्येतानि भोज्यानि रम्भोऽन्यानि
विवर्ज्जयेत्॥"

यथास्य पर्य्यायाः।

"वृक्षाम्लन्तिन्तिड़ीकञ्च चुक्रं स्यादम्लवृक्षकम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

आमपक्वावस्थयोरस्य गुणा यथा,—

"वातापहं तिन्तिड़ीकमामं पित्तबलासकृत्।
ग्राह्युष्णं दीपनं रुच्यं सम्पक्वं कफवातनुत्॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

तिन्तिड़ीकः, पुं, (तिम + ईकन्। निपातनात् साधुः।) तिन्तिड़ी। इत्यमरटीकायां भरतः॥

तिन्तिड़ीद्यूतम्, क्ली, (तिन्तिड़ीभिस्तिन्तिड़ीजात-वीजैर्यद्द्यूतम्।) चुचुरी। इति शब्दरत्नावली॥ काँइवीचिर खेला इति भाषा॥

तिन्तिलिका, स्त्री, (तिन्तिड़िका। ड़स्य लत्वम्।) तिन्तिड़ी। इत्यमरटीका॥

तिन्तिली, स्त्री, (तिन्तिड़ी। ड़स्य लत्वम्।) तिन्तिड़ी। इति शब्दरत्नावली॥

तिन्तिलीका, स्त्री, (तिन्तिड़ीका। ड़स्य लत्वम्।) तिन्तिड़ी। इत्यमरटीका॥

तिन्दिशः, पुं, टिण्डिशवृक्षः। इति राजनिर्घण्टः॥

तिन्दुः, पुं, (तिम्यति आर्द्रीभवतीति। तिम आर्द्रीभावे + "मृगय्वादयश्च।" इति कुप्रत्ययेन साधुः।) तिन्दुकवृक्षः। इति शब्दरत्नावली॥

तिन्दुकं, क्ली, (तिन्दुरिव कायतीति। कै + कः।) कर्षपरिमाणम्। इति वैद्यकपरिभाषा॥ (यथा, शार्ङ्गधरे पूर्व्वखण्डे १ अध्याये।

"कोलद्वयञ्च कर्षः स्यात् स प्रोक्ता पाणिमालिका।
अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम्॥"

यथास्य पर्य्यायाः।

"विडालपदकञ्चैव तिन्दुकञ्च विजानीयात् कवड़ग्रहमेव च॥"

— see below for continuation:

"पिचाद्धौ ("विदाहो") ...

तिन्दुकञ्च विजानीयात् कवड़ग्रहमेव च॥"
इति कल्पस्थाने द्वादशेऽध्याये चरकेणोक्तम्॥)

तिन्दुकः, पुं, स्त्री, (तिन्दु + स्वार्थे संज्ञायां वा कन्।) वृक्षविशेषः। गाव् इति ख्यातः। इत्यमरटीकासारसुन्दरी॥ केन्दुकवृक्षः। इति भरतः॥ इति राजनिर्घण्टश्च। तैँदु इति भाषा॥ तत्पर्य्यायः। स्फुर्जकः २ कालस्कन्धः ३ शितिसारकः ४। इत्यमरः। २। ४। ३८॥ स्फूर्जकः ५ केन्दुः ६ तिन्दुः ७ तिन्दुलः ८ तिन्दुकिः ९ तिन्दुकी १०। इति शब्दरत्नावली॥ नीलसारः ११ अतिमुक्तकः १२ स्वर्य्यकः १३ रामणः १४ स्फूर्जनः १५ स्यन्दनाह्वयः १६ कालसारः १७। (यथा, महाभारते।३।६४।३।

"शालवेणुधवाश्वत्थतिन्दुकेङ्गुदकिंशुकैः।
अर्ज्जुनारिष्टसंछन्नं स्यन्दनैश्च सशाल्मलैः॥")

अस्य आमफलस्य गुणाः। कषायत्वम्। ग्राहित्वम्। वातकारित्वम्। शीतलत्वम्। लघुत्वञ्च। पक्वफलस्य गुणाः। मधुरत्वम्। स्निग्धत्वम्। दुर्जरत्वम्। श्लेष्मदत्वम्। गुरुत्वम्। व्रणवातनाशित्वम्। पित्तप्रमेहास्रकारित्वम्। विषदत्वञ्च। इति राजनिर्घण्टः॥ पित्तप्रमेहास्रश्लेष्मनाशित्वम्। इति भावप्रकाशः॥ तत्सारं चिररोगजित्॥ विश्वतिन्दुकमप्येवं विशेषात् ग्राहि शीतलम्॥ इति राजनिर्घण्टः॥

तिन्दुकिः, स्त्री, (तिन्दुकी। निपातनात् ह्रस्वः।) तिन्दुकः। इति शब्दरत्नावली॥

तिन्दुकिनी, स्त्री, (तिन्दुकस्तदाकारः फलेऽस्त्यस्याः। तिन्दुक + इनि + ङीप्।) आवर्त्तकी। इति राजनिर्घण्टः॥

तिन्दुकी, स्त्री, (तिन्दुक + गौरादित्वात् ङीष्।) तिन्दुकः। इति शब्दरत्नावली॥ (यथा, सुश्रुते चिकित्सितस्थाने २ अध्याये।

"पियालवीजं तिन्दुक्यास्तरुणानि फलानि च।
यथालाभं समाहृत्य तैलमेभिर्विपाचयेत्।
सद्यो व्रणेषु देयानि तानि वैद्येन जानता॥"

अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम्।

"कालस्कन्दस्तिन्दुकश्च स्फूर्ज्जकस्तिन्दुकीति च॥")

तिन्दुलः, पुं, तिन्दुकवृक्षः। इति शब्दरत्नावली॥

तिप, ऊ ऋ ङ चुरति। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-वेट्।) ऊ, तेपिष्यते तेप्स्यते। ऋ, अतितेपत्। ङ, तेपते तितिपे। चुरत् क्षरणम्। इति दुर्गादासः॥

तिम, क्लेदने। आर्द्रीभाव इति यावत्। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्॥)

तिम, य क्लेदने। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-सेट्।) य, तिम्यति। तितेम। क्लेदनमार्द्रीभावः। इति दुर्गादासः॥

तिमिः, पुं, (तिम्यतीति। तिम क्लेदने + इन्। यद्वा, ताम्यति आकाङ्क्षतीति। तमु काङ्क्षायाम् + "क्रमितमिशतिस्तम्भामत इच्च।" उणां ४। १२१। इति इन् अकारस्य इकारादेशश्च।) मत्स्यविशेषः। इत्यमरः। १। १०। १९॥ तिमिर्महाकायो मत्स्यः कश्चित् सामुद्रः। तथा च। अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तरः। इति भरतः॥ (यथा च रघौ। १३। १०।

"ससत्त्वमादाय नदीमुखाम्भः
संमीलयन्तो विवृताननत्वात्।
अमी शिरोभिस्तिमयः सरन्ध्रै-
रूर्द्ध्वं वितन्वन्ति जलप्रवाहान्॥")

समुद्रः। इति त्रिकाण्डशेषः॥ (राजविशेषः। स तु दूर्व्वस्य पुत्त्रः। यथा, भागवते। ९।२२।४२।

"नृपञ्जयस्ततो दूर्व्वस्तिमिस्तस्माज्जनिष्यति॥"

अयं हि नवमासाधिकसप्तचत्वारिंशत्वर्षं यावत् राज्यं पालयामास। यथा, राजावल्याम्। १ परिच्छेदे।

"तिमिं पुत्त्रं ततो राज्ये न्यस्य स्वर्गं स्वयं गतः।
मुनिवेदमितान् वर्षान्नवमासाधिकान् तिमिः॥
पालयित्वाखिलं राज्यं भुक्ता भोगमनुत्तमम्।
पुत्त्रं बृहद्रथं राज्ये सोऽभिषिच्य वनं ययौ॥")

तिमिकोषः, पुं, (तिमेः कोष इव।) समुद्रः। इति त्रिकाण्डशेषः॥

तिमिङ्गिलः, पुं, (तिमिं गिरतीति। गॄ + कः। रस्य लः। गिलेऽगिलस्येति मुम्।) मत्स्यविशेषः। इत्यमरः। १। १०। २०॥ (यथा, महाभारते। १। २२। ३।

"तिमिङ्गिलसमाकीर्णं मकरैरावृतं तथा॥"

द्वीपविशेषः। तद्द्वीपजाते, त्रि। यथा, महाभारते। २। ३२। ६६।

"तिमिङ्गिलञ्च स नृपं वशे कृत्वा महामतिः॥")

तिमिङ्गिलगिलः, पुं, (तिमिङ्गिलमपि गिरतीति। गॄ + कः। मुम् च।) महामत्स्यविशेषः। इति हेमचन्द्रः। ४। ४१४॥

तिमितः, त्रि, (तिम + कर्त्तरि क्तः।) निश्चलः। इति धरणिः॥ (यथा, पञ्चदशी। २। ३५।

"अतस्तिमितगम्भीरं न तेजो न तमस्ततम्॥")

क्लिन्नः। इत्यमरः। ३। १। १०५॥

तिमिरं, क्ली, (तिम्यतीति। तिम + "इषिमदिमुदीति।" उणां। १। ५२। इति किरच्।) अन्धकारः। इत्यमरः। १। १०। ३॥ (यथा, रामायणे। २। २८। १८।

"अतीववातस्तिमिरं बुभुक्षा चास्ति नित्यशः।
भयानि च महान्त्यत्र अतो दुःखतरं वनम्॥")

नेत्ररोगविशेषः। तस्य लक्षणमाह माधवकरः।

"तिमिराख्यः स वै दोषश्चतुर्थं पटलं गतः।
रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशमतः परम्॥"

(अस्य लक्षणानि यथा,—

"दोषे मण्डलसंस्थाने मण्डलानीव पश्यति।
द्विधैकं दृष्टिमध्यस्थे बहुधा बहुधास्थिते॥
दृष्टेरभ्यन्तरगते ह्रस्ववृद्धविपर्य्ययम्।
नान्तिकस्थमधःसंस्थे दूरगं नोपरिस्थितम्॥
पार्श्वे पश्येन्न पार्श्वस्थे तिमिराख्योऽयमामयः।
प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते॥
तेनोर्द्ध्वमीक्षते नाधस्तनुचेलावृतोपमम्।